अह..........र्ग्यात्मके बृहदारण्यके प्रवर्ग्योपसत्प्रतिपादकप्रथमद्वितीयाध्यायानुपेक्ष्योत्तराध्यायगणो व्याख्यायते। यद्य'प्युषा वा अश्वस्ये'त्यादिकमप्यश्वमेधादिकर्मविषयकमेव...ब्रह्मदृष्टिविधिरूपतया ब्रह्मात्मकत्वप्रतिपादनपरतया च यथाकथञ्चिद्ब्रह्मसम्बन्धित्वेन तद्व्याख्यानस्योचितत्वात् अत एवाश्वमेधब्राह्मणादेर्ब्रह्मोपनिषद्भागसङ्गतिरुपपद्यते ॥

End:

आचार्येभ्यो नमस्कृत्य...वंशस्य कीर्तयेत् ।
त्वया पूर्वेषां भवति नेतायुर्दीर्घमश्नुते ॥
इत्युक्त्वानुक्रमेद्वंशमा(त्...ब्र)ह्मणो नयत् ।

आब्रह्मणो वंशपरम्पराकीर्तनस्य श्रेयोहेतुत्वं शास्त्रसिद्धमिहानुसन्धेयं ॥

क्षेमाय यः करुणया क्षितिनिर्जराणां
भूमावजृम्भयत भाष्यसुधामुदारः ।
वामागमाध्वगवदाग्रदतूलवातो
रामानुजस्स मुनिराद्रियतां मदुक्तिम् ॥

Colophon:

इति श्रीमत्तातयाचार्यचरणारविन्दचञ्चरीकस्य वात्स्यानन्तार्यपादसेवासमधिगतशारीरकमीमांसाभाष्यहृदयस्य परकालमुनिपादसेवासमधिगतपारमहंस्यस्य श्रीरङ्गरामानुजमुनेः कृतिषु बृहदारण्यकप्रकाशिका समाप्ता ॥

Subject: Bṛhadāraṇyakopaniṣad Prakāśikā—a commentary on this Upaniṣad, according to the Viśiṣṭādvaita school of philosophy.

Remarks:—The Ms. is old and is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1674.

॥ बृहदारण्यकोपनिषत्प्रकाशिका ॥

1677. BṚHADĀRAṆYAKOPANIṢAD PRAKĀŚIKĀ.

Burnell's Catalogue No. 9734 c. Page 97. Right column.

Substance—Palm leaf. Size—18×1¼ inches. Leaves—181

(193-373). Lines—5 to a Page. Script—Telugu. No. of Granthas—5120. Author—Raṅgarāmānuja. Complete.

Beginning, end, colophon and subject—Same as No. 1676.

Remarks :—The Ms. is old and is in a fairly good condition. For the other works contained in this Ms. see the list under **Remarks** on No. 1675.

॥ वेदाङ्गानि ॥

VEDĀṄGAS.

॥ शिक्षा ॥

1678. ŚIKṢĀ.

Burnell's Catalogue No. 2390. Page 36. Right column.
Substance—Paper. Size—8×3 inches. Sheets—5. Lines —9 to a Page. Script—Devanāgarī. No. of Granthas—64. Author—Pāṇini. Complete.

Beginning :

श्रीवेङ्कटेशप्रसन्न । ॐ ।

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा ।
शास्त्रानुपूर्व्यं(र्वे) तद्विद्याद्यथोक्तं लोकवेदयोः ॥
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥

End:

त्रिनयनमभिमुखनिस्सृतामिमां
य इह पठेत्प्रयतश्च सदा द्विजः ।
स भवति धनधान्यपशुपुत्रकीर्तिमा-
नतुलं च सुखं समश्नुते दिवीति दिवीति ॥ ६० ॥

॥ ११ ॥

Colophon :

इति ऋग्वेदपाणिनिशिक्षा समाप्ता ॥

Subject: Pāṇinīya śikṣā—a treatise on Phoneties. 1-11 sections. 1-60 Verses.

Remarks: —The Ms. is in good condition. An index, like " अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथा गीत्यचोस्पृष्टोदात्तं चाषस्तु शंकर एकादश ॥ giving the begining of each section is found in the end. This Ms. is now available in print along with the Siddhānta Kaumudī in the Nirṇayasāgara Press, Bombay.

Regarding its publication Dr. Burnell observes that the Śikṣā is "edited by Prof. Weber in Indische Studien Vol. IV. pp. 345-371. These Mss. (Burnell Nos. 2390, 2391 and 2392) follow the Ṛg-Veda recension and are all recent. They have been copied from South Indian Mss. apparently."

॥ शिक्षा ॥

1679. ŚIKṢĀ.

Burnell's Catalogue No. 2391. Page 36. Right column. Substance—Paper. Size—9¾ × 3⅝ inches. Sheets—6. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—64. Author—Pāṇini. Complete.

Beginning, end, colophon and subject—Same as No. 1678.

Remarks:—The Ms. is in good condition. For the index of this Ms. see Remarks on No. 1678.

॥ शिक्षा ॥

1680. ŚIKṢĀ.

Burnell's Catalogue No. 2392. Page 36. Right column. Substance—Paper. Size—9½ × 4 inches. Sheets—6. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—64. Author—Pāṇini. Complete.

Beginning, end and subject—Same as No. 1678.

Colophon:

॥ इति वेदाङ्गशिक्षा समाप्ता ॥

Remarks:—The Ms. is in good condition. For the index of this Ms. see Remarks on No. 1678.

॥ शिक्षा ॥

1681. SIKṢĀ.

J. L. Collection No. 166. Substance—Paper. Size—8×4½ inches. Sheets—5. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—70. Author—Pāṇini. Complete.

Beginning, end and subject—Same as No. 1678.

Colophon :

श्रीसाम्बसदाशिवार्पणमस्तु ॥

इति शिक्षा समाप्ता ॥

शालिवाहनशके १७५२ विकृतिसंवत्सरे आषाढामावास्यायां सौम्यवासरे इदं पुस्तकं वृकोपनाम्ना महादेवेन लिखितम् । महादेवस्येति ज्ञेयम् । श्रीसुन्दरेश्वरार्पणमस्तु । स्वार्थं परार्थं स्यात् ।

आर्जितं भूरिकष्टेन पुस्तकं लिखितं मया ।
हर्तुमिच्छति यः पापी तस्य वंशक्षयो भवेत् ॥

श्रीभैरवाय नमः ॥ ॐ लक्ष्मीनृसिंह्मार्पणमस्तु । प्रणतार्तिहरेश्वरार्पणमस्तु ॥

Remarks :—The beginning of the Vedāṅga jyautiṣa "पञ्चसंवत्सर-मयं" is given after the colophon. On the last page of this Ms. the following verses of the scribe are given :

संवत्सरे च विकृतावाषाढे कृष्णपक्षके ।
चन्द्रवारे ह्यमावास्यां(वारेऽमावास्यायां) पुस्तकं लिखितं मया ॥
महादेवेन लिखितं वृक इत्युपनामकः ।
तस्येदं पुस्तकं ज्ञेयं लिखितं तेन तद्दिने ॥

The Ms. is dated Śaka 1752 in Vikṛti year or 1830 A. D. The Ms. is in good condition. The verse 'वागर्थाविव+परमेश्वरौ'

is given on the front page of this Ms. in addition to the name of the owner and the scribe, Vṛkamahādeva.

॥ शिक्षा ॥

1682. ŚIKṢĀ.

J. L. Collection No. 167. Substance—Paper. Size—7¼ × 5 inches. Sheets—6. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—64. Author—Pāṇini. Complete.

Beginning, end and subject—Same as No. 1678.

Colophon:

इति शिक्षा समाप्ता ॥

Remarks:—For Index see Remarks on No. 1678. The beginning of the Vedāṅga jyautiṣa "पञ्चसंवत्सरमयं" is given after the end. The Ms. is old and is in good condition.

॥ शिक्षा ॥

1683. ŚIKṢĀ.

J. L. Collection No. 168. Substance—Paper. Size—9¼ × 4½ inches. Sheets—3 (3-5). Lines—7 to 9 to a Page. Script—Devanāgarī. No. of Granthas—36. Author—Pāṇini. Incomplete.

Beginning:

(यथा सौरा)ष्ट्रिका नारी तक्रँ इत्यभिभाषते ।
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥
रङ्गवर्णं प्रयुञ्जीरन्नोग्रसेत्पूर्वमक्षरम् ।
दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् ॥

End:

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।

Subject: Pāṇinīya Śikṣā. 6-11 sections.

Remarks:—The Ms. is old and is in good condition. The Ms. begins abruptly with the first stanza of the 6th Section and breaks off in the fourth stanza of the 11th section.

॥ शिक्षा ॥

1684. ŚIKṢĀ.

T. S. Collection No. 62. Substance—Paper. Size—9 × 4¼ inches. Sheets—6. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—64. Author—Pāṇini. Complete.

Beginning, end, colophon and subject—Same as No. 1678.

Remarks:—The Ms. is in good condition. *For the index of this Ms. see Remarks on No. 1678.

॥ शिक्षा ॥

1685. ŚIKṢĀ.

T. S. Collection No. 63. Substance—Paper. Size—9¼ × 3⅞ inches. Sheets—6. Lines—7 or 8 to a page. Script—Devanāgarī. No. of Granthas—64. Author—Pāṇini. Complete.

Beginning, end and subject—Same as No. 1678.

Colophon:

इति शिक्षा वेदाङ्गं सम्पूर्णम् ॥

राक्षससंवत्सरे उ, श, मा, शु, पं, स्थि, सरस्वत्युपनाम्ना

हरिभट्टेन लिखितं ।

जघननिर्विषयीकृतमेखलाननुचिताश्रवलुप्तमशेषकान् ।

सरिपर(?)गणानकरोद्दुलादनलकानिळकाधि(?)पत्रिक्रमः ॥

Remarks :—The Ms. is in good condition. For the index of this Ms. see remarks on No. 1678.

The Ms. is dated Saturday—fifth day after the new moon—in Māgha month in Rākṣasa year which exactly corresponds to Śaka 1538 or 13th January 1616 A. D. The scribe's name is Hari bhaṭṭa Sarasvati. In the colophon the letters उ, श, मा, शु, पं, स्थि evidently stand for उत्तरायणे, शरदृतौ, मार्गशीर्षमासे, शुक्लपक्षे, पञ्चम्यां and स्थिरवासरे ॥

॥ सर्वशिक्षासङ्ग्रहः ॥

1686. SARVAŚIKṢĀSAṄGRAHAḤ.

J. L. Collection No. 78. Substance—Paper. Size—9×4¼ inches. Sheets—5. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—34. Author—(?). Incomplete (wants end).

Beginning :

श्रीगणेशाय नमः—

प्रणिपत्य प्रातिशाख्यशिक्षाकर्तॄन्मुनीनहं ।
सारानुद्धृत्य शिक्षाभ्यः कुर्वे लक्षणसङ्ग्रहम् ॥ १ ॥
लकारस्य वकारस्य संयोगे स्वरितो यदि ।
संयुक्तौ तौ तदा ज्ञेयावसंयुक्तौ तदन्यथा ॥ २ ॥

End :

हशोत्तरो लकारश्च प्राप्नुयात्स्वरभक्तितां ।
स्वरभक्तिः परः स्वारात् प्रचयत्वमवाप्नुयात् ॥ ८ ॥

Colophon : Nil.

Subject : Sarvaśikṣā saṅgraha. 1-3 Sections, the first sction consisting of 15 verses, the second 11 verses and the third 8 verses.

Remarks :—The Ms. is in good condition. Sheets are written only on one side. This work gives a summary of all the essen-

tial points found in all Prātiśākhyaśikṣās as indicated in the first introductory verse given above.

॥ छन्दः ॥

1687. CHANDAḤ

Burnell's Catalogue No. 2384 b. Page 36. Right column. Substance—Paper. Size—$8\frac{1}{4}\times 3$ inches. Sheets—7 (16-22). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—80. Author—Piṅgala. Complete.

Beginning:

ॐ मयरसतजभनलगसम्मितं
भ्रमति वाङ्मयं जगति यस्य ।
स जयति पिङ्गलनागः
शिवप्रसादाद्विशुद्धमतिः ॥ १ ॥

त्रिगुरुं विद्धि मकारं लघ्वादिसमन्वितं यका(रा)ख्यं ।
लघुमध्यमं तु रेफं सकारमन्ते गुरु निबद्धम् ॥
लघ्वन्त्यं हि तकारं जकारमुभयोर्लघुं विजानीयात् ।
आदिगुरुञ्च भकारं नकारमिह पैङ्गले त्रिलघुम् ॥ ३ ॥
दीर्घं संयोगपरं तथाप्लुतं व्यञ्जनान्तमूष्मान्तम् ।
सानुस्वारञ्च गुरुं क्वचिदवसानेपि लघ्वन्त्यम् ॥ ४ ॥
आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥ ५ ॥
त्रिविरामं दशवर्णं षण्मात्रं उवाच पिङ्गलः सूत्रम् ।
छन्दो वर्गपदार्थप्रत्ययहेतोश्च शास्त्रादौ ॥ (६)—१ ॥
धी श्री स्त्रीम् । वरासाय् । कागुहार् ॥

End:

तावदर्धे तद्गुणितं । द्विर्द्व्यूनं । तदन्तानां । एकोनेत्था (द्धा) । परे पूर्णं । परे पूर्णमिति ॥

Colophon:

इति छन्दः समाप्तः(म्) । श्रीसत्याधिराजगुरुभ्यो नमः ।

Subject: Piṅgala Sūtras on Prosody. (1-8 Adhyāyas). 1-18 Vargas.

Remarks:—The Ms. is recent and is in good condition. At the end of this Ms. the following Varga-index is given (giving the beginnings and the extent of the Vargas only):

"मय द्वादश । धीः पञ्चदश । छन्दः षोडश । पादः परोष्णिक् प्रस्तारपङ्क्तिर्विंशतिः । विंशतिरेकाविंशतिः । देवतादितोष्टौ । चतुश्शतं षष्ठो विंशतिर्विंशतिः युगपरान्तिका त्रयोदश । वृत्तं गात्रादौ विंशतिर्विंशतिः । यवमती त्रीणि । यतिरेकोनाविंशतिः । वातोर्मिमष्टादश । प्रहर्षणीं विंशतिः । शार्दूलविक्रीडितं पञ्चदश । अत्रानुक्तं सप्तदश । अष्टादश ॥ १८ ॥

The Adhyāya division is not given in this Ms. Besides this work this Ms. contains two other works (1) निघण्टुः, (2) वेदाङ्गज्योतिषम् ॥ Regarding its publication, Dr. Burnell observes that Piṅgala Chandas is 'edited with a translation and notes in Indische Studien Vol. VIII. by Prof. Weber and reprinted with Halāyudha's commentary, in the Bibliotheca Indica.' Whether the first six verses given in the beginning form a part of Piṅgala's text is doubtful. Some hold that they are the commentator Halāyudha's verses.

॥ छन्दः ॥

1688. CHANDAḤ.

Burnell's Catalogue No. 2387. Page 36. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 4$ inches. Sheets—8. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—80. Author—Piṅgala. Complete.

Beginning, end and subject—Same as No. 1687.

Colophon :

इति वेदाङ्गछन्दः समाप्तः(प्त) ॥

तुलजाराजस्य पुस्तकम् ॥

Remarks :— The Ms. is in good condition. It belonged to Tulajārāja of Tanjore between 1765-87 A. D. For the index of this Ms. see Remarks on No. 1687.

॥ छन्दः ॥

1689. CHANDAḤ.

Burnell's Catalogue No. 2388. Page 86. Right column Substance—Paper. Size—9½ × 4 inches. Sheets—6. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—80. Author—Piṅgala. Complete.

Beginning, end and subject—Same as No. 1687.

Colophon:

इति छन्दःसूत्राणि ॥

Remarks :—The Ms. is old and is in a fairly good condition. For the index of this Ms. see Remarks on No. 1687.

Along with the varga division the Adhyāya division also is given in this Ms. as follows:—

1st	Adhyāya	=	1-2	Vargas
2nd	,,	=	3rd	Varga.
3rd	,,	=	4-7	Vargas.
4th	,,	=	8-10	,,
5th	,,	=	11-13	,,
6th	,,	=	14-15	,,
7th	,,	=	16-17	,,
8th	,,	=	18th	Varga.

॥ छन्दः ॥

1690. CHANDAḤ.

J. L. Collection No. 87 a. Substance—Paper. Size—9½ × 4 inches. Sheets—5(8-12). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—72. Author—Piṅgala. Incomplete (wants beginning).

Beginning:

धी श्री स्त्रीं । वरासाय् । कागुहार् । वसुधास् । साते
क्त् । कदा सज् । किं वदभ् । न हसन् । गृ ल् । गन्ते ।
ध्रादिपरः । हे । लौं सः । ग्लौ । अष्टौ वसव इति ॥ २ ॥

End and subject—Same as No. 1687.

Colophon:

इति पिङ्गलसूत्रः(म्) (समाप्तः(म्) ॥

Remarks :— The Ms. is in good condition. The Ms. begins only with the second varga of the First Adhyāya. For the index of this Ms. see Remarks on No. 1687. The other work contained in this Ms. is यास्कनिघण्टुः ॥

॥ निदानसूत्रम् ॥

1691. NIDĀNA SŪTRAM.

Burnell's Catalogue No. 9101·c. Page 11. Left column. Substance—Palm leaf. Size—16⅝ × 1⅛ inches. Leaves—5 (13-17). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—65. Author—Patañjali(?). Complete.

Beginning:

अथातश्छन्दसां विचयं व्याख्यास्यामः । त्रयश्छन्दः-
पादा भवन्त्यष्टाक्षर एकादशाक्षरो द्वादशाक्षर इति ।
ननु मिश्रन्दशाक्षरोऽष्टाक्षर आ पञ्चाक्षरतायाः प्रतिकाम-

ति । विश्वेषां हित इत्या चतुरक्षरतायां इत्येक आ द-
शाक्षरताया अभि क्रामति । वयं तदस्य सम्भृतं वस्त्वित्ये-
कादशाक्षर आ नवाक्षरतायाः प्रतिक्रामति यदि वा दधि
यदिवानेत्याऽष्टाक्षरताया इत्येक आ पञ्चदशाक्षरताया
अभिक्रामति ॥

End:

अर्थाभिप्रायणान्न्यूनीभात्रोऽर्थाभिप्रायणादि (द) तिरे-
कोऽथ यत्रैतदक्षरमागच्छति तामिति वा तदुतोनीकरोत्ये-
काक्षरीभाविनो वा सन्धयस्तदस्यै(थै)तौ श्लोकौ भवतः ।

चत्वारिसन्धिजातानि यैश्छन्दो ह्रसते न च ।
प्रश्लिष्टमभिनिहितं क्षिप्रसन्धिराभिद्रुतम् (क्षिप्रमथप्रद्रुतं) ॥
एतानि सन्धिजातानिमिमानश्छन्द(न्दो अ)सोक्षरैः ।
द्वैधं कुर्यात्सम्पूर्णेन पूर्णे किञ्च(न)नेङ्गयेदिति ॥
छन्दसां विचयञ्ज्ञानन्यश्शरीराद्विमुच्यते ।
छन्दसामेति सालोक्यमानन्त्यायाश्नुते(य श्रुतेः) श्रिय-
मिति ॥

Colophon:

द्वितीयः ॥

Subject: Nidāna Sūtras—a treatise on metres belonging to Sāma Veda. This Ms. contains two main sections, first consisting of four and second, three sub-sections.

Remarks:—The Nidānasūtras available in print in the Benares Sanskrit series contain a division of the Text into 12 prapāṭhakas, each prapāṭhaka consisting of a good number of Khaṇḍas; but this Ms. is only a fragment, containing the first seven Khaṇḍas of the first Prapāṭhaka. An index of the sections contained in this Ms. is given after the colophon, in reverse order:

"अथावसानानि । अथ निचृद्भुरिजः । ऊर्ध्वंजगत्या अतिश्छन्दसौ । चतुश्चत्वारिंशदक्षरा त्रिष्टुप् । चत्वारिंशदक्षरा पङ्क्तिः । चतुर्विंशदक्षरा गायत्री । अथातश्छन्दसां विचयं व्याख्यास्यामः ।"

The Ms. is in a fairly good condition. This Ms. contains the following works :

(1) प्रतिहारसूत्रम् (3) निदानसूत्रम्

(2) प्रस्तावसूत्रम् (4) प्रधानसूत्रम् ॥

A Transcribed copy of the Ms. in paper is also available in this Library. See Transcript Volume No. 41 the date of copying being, Śaka 1834 or 1914 A. D. T. V. No. 41 (22).

॥ छन्दोमञ्जरी ॥

1692. CHANDOMAÑJARĪ.

Burnell's Catalogue No. 2395. Page 3. Right column. Substance—Paper. Size—10×4 inches. Sheets—7. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Viṣṇubhaṭṭa(?). Complete.

Beginning :

श्रीगणेशः प्रसन्नः ।

अथातिजगत्यादिसप्तवर्गे पादविशेषा अनुक्रमण्यन्तरोक्ता उच्यन्ते ॥

पादा अतिजगत्यां तु त्रयो द्वादशकाः परौ ।
अष्टौ (च) शक्करीपादाः सप्तैवाष्टाक्षराश्च ते ॥ १ ॥
अतिशाक्करपादौ द्वावादितः षोडशाक्षरौ ।
जागतोथाष्टकावष्टिपादाः षोडशकास्त्रयः ॥ २ ॥
अष्टकौ चात्यष्टिपादौ जागतौ चाष्टकास्त्रयः ।
जागतश्चाष्टकश्चाथ धृतिपादौ तु जागतौ ॥ ३ ॥

पादास्त्रयोऽष्टकाश्चाथ षोडशाक्षर एव च ।
अष्टकश्चाथातिधृतौ जागतः षोळशाक्षरः ॥ ४ ॥
त्रयोष्टका जागतश्च तथैवाष्टक इत्यपि ।
परः सप्तकपादास्तु प्रसङ्गात्स्वयमीरिताः ॥ ५ ॥

छन्दोमञ्जरी कथ्यते । प्रथमं छन्दः गायत्री । ८, ८, ८, उदाहरणानि । अग्निमीळे ॥

End :

अतिजगती १३, १३, १३, १३ तमिन्द्र ॥ बृहती यवमध्या । वामीवामस्य । यवमध्या । ८, ८, १२, ८, ८, सद्यःश्रिस्य ॥

Colophon :

इति छन्दोमञ्जरी समाप्ता ॥

Subject: Chandomañjarī on vedic metres.

Remarks:—The Ms. is in good condition. This Ms. does not give the name of the author; but Dr. Lakṣmaṇa Sarup's Introduction to the Nighaṇṭu gives on pages 7 and 8 information regarding the author of this work: cf.—

" प्रणम्य वेदं पुरुषं छन्दः शास्त्रेषु निश्चितं ।
विष्णुभट्टैस्त्विदं प्रोक्तं छन्दोमञ्जरिमादिता(?) ॥ etc.
इति श्रीविष्णुभट्टविरचिता छन्दोमञ्जरी समाप्ता ॥"

॥ निघण्टुः ॥

1693. NIGHAṆṬUḤ.

Burnell's Catalogue No. 2384 a. Page 2. Right column. Substance—Paper. Size—8¼ × 3 inches. Sheets—13 (1-13). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas —185. Author—Yāska. Complete.

Beginning:

श्रीवेङ्कटेश(ः)प्रसन्न(ः) । ॐ

गौः । ग्मा । ज्मा । क्ष्मा । क्षा । क्षमा । क्षोणी(णिः) । क्षितिः । अवनिः । उर्वी । पृथ्वी । मही । रिपः । अदितिः । इळा । निर्ऋतिः । भूः । भूमिः । पूषा । गातुः । गोत्रेत्येकविंशतिः पृथिवीनामधेयानि ॥ १ ॥

End:

अश्विनौ । उषाः । सूर्या । वृषाकपायी । सरण्यूः । + + + सप्तऋषयः । देवाः । विश्वेदेवाः । साध्याः । वसवः । वाजिनः । देवपत्न्यो देवपत्न्य इत्येकत्रिंशत्पदानि ॥६॥

Colophon:

इति पञ्चमो(ऽ)ध्यायः ॥

Subject: Nighaṇṭu. Naighaṇṭuka, Naigama and Daivata Kāṇḍas. 1-5 Adhyāyas.

This Ms. adopts the following division of Nighaṇṭu into Kāṇḍas, Adhyāyas and Khaṇḍas :—

I. Naighaṇṭuka Kāṇḍa	First Adhyāya	1—17 Khaṇḍas.	
,, ,,	Second ,,	1—22	,,
,, ,,	Third ,,	1—30	,,
II. Naigama ,,	Fourth ,,	1— 3	,,
III. Daivata ,,	Fifth ,,	1— 6	,,

Remarks:—The Ms. is recent and is in good condition. It is accented. The Khaṇḍa Index (giving the beginnings only) is given at the end of each Adhyāya in this Ms. For example, the following is the index of the Fifth Adhyāya:—

"अग्निर्द्रविणोदा अश्वो वायुः श्येनो(ऽ)श्विनौ षट् ॥"

The other works contained in this Ms. are वेदाङ्गज्योतिषम् and पिङ्गलछन्दः. This work is edited by Dr. Roth in Germany and by Jīvānanda Vidyā Sāgar at Calcutta.

॥ निघण्टुः ॥

1694. NIGHANṬUḤ

Burnell's Catalogue No. 2386. Page 2. Right column. Substance—Paper. Size—8 × 3¼ inches. Sheets—20. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—185. Author—Yāska. Complete.

Beginning, end, colophon and subject—Same as No. 1693.

Remarks :—The Ms. is old and is in a fairly good condition. It is accented. For the index in this Ms. see Remarks under No. 1693.

॥ निघण्टुः ॥

1695. NIGHANṬUḤ.

J. L. Collection No. 87 b. Substance—Paper. Size—9½ × 4 inches. Sheets —13 (12-24). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—185. Author—Yāska. Complete.

Beginning, end and subject—Same as No. 1693.

Colophon:

इति निघण्टौ पञ्चमो(ऽ)ध्यायः ।
श्रीकाशीविश्वेश्वरार्पणमस्तु ।

संवत् १८७५ शके १७४० विरोधिनामसंवत्सरे वैशाखमासे
शुक्लपक्षे तिथि(थौ) चतुर्दश्यां भौमवासरे इदं
पुस्तकं समाप्तम् ।

तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यं एवं वदति शारदा ॥

Remarks :—The Ms. is in good condition and is accented. For the index in this Ms. see Remarks on No. 1693. The other work contained in this Ms. is छन्दः or पिङ्गलसूत्रम्.

This Ms. is dated saṃvat 1875 or Śaka 1740 (in Virodhi year according to the Northern Cycle) or May 1818 A. D.

॥ निघण्टुः ॥

1696. NIGHAṆṬUḤ.

T. S. Collection No. 64. Substance—Paper. Size—$8\frac{1}{2}\times3\frac{3}{4}$ inches. Sheets—9 (1-10, 6th missing). Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—170. Author —Yāska. Incomplete.

Beginning, end and subject—Same as No. 1693.

Colophon :

निघण्टौ पञ्चमोऽध्यायः ।
वेदाङ्गनिघण्टुः समाप्तः ।
संवत् १७१७ माघशुद्ध १४ तद्दिने इदं पुस्तकं काश्यां
दशाश्वमेधे अगस्ती(स्त्ये)श्वरसन्निधौ(लिखितं) ।
इदं पुस्तकं गोपालभट्टस्य पुस्तकं ।

Remarks :—The Ms. is old and is in a fairly good condition. It is accented. This Ms. is dated fourtenth day after new moon in Māgha Month in Saṃvat year 1717 which corresponds to Sunday 3rd February 1661 A.D. The Ms. is said to have been copied at the front side of Śri Agasteśvara (Śri Agastyeśvara) Temple when the ten Aśvamedha sacrifices were performed in Benares. The Ms. belonged to one Gopāla bhaṭṭa.

॥ निघण्टुः ॥

1697. NIGHAṆṬUḤ.

S. K. Collection No. 6. Substance—Paper. Size $9\frac{1}{2}\times6$ inches Sheets—5. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—75. Author— Yāska. Incomplete.

Beginning—Same as No. 1693.

End :

रेळते । हेळते । भामते । भृ(हृ)णीयते । श्रीणाति ।
श्रेषति । दोधति । वनुष्यति । कम्पते । भोजते । इति
दश क्रुध्य(तिकर्माणः ॥ १२ ॥)

Colophon :

इति निघण्टौ प्रथमो(ऽ)ध्यायः ।

Subject: Nighaṇṭu. First and Second Adhyāyas.

Remarks:—The Ms. is in good condition. This Ms. abruptly breaks off in the end of the twelfth Khaṇḍa of the Second Adhyāya. This Ms. is not accented.

॥ निघण्टुः ॥

1698. NIGHAṆṬUḤ.

T. S. Collection No. 28. Substance—Paper. Size—9×3¾ inches. Sheets—7. Lines—7 to 9 to a Page. Script—Devanāgarī. No. of Granthas—62. Author—Yāska. Incomplete.

Beginning—Same as No. 1693.

End :

वश्मि । उश्मसि । वेति । (वेनति ।) वेसति । वाञ्छति ।
वष्टि । वनोति । जुषते । हर्यति । आचते(के)। उशिक् ।
मन्यते । छत्सा(न्त्स)त् । चाकनत् । चकमानः । कनति ।
कानिषत् । इत्यष्टादश कान्तिकर्माणः ॥ ६ ॥

Colophon and subject—Same as No. 1697.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly breaks off with the Sixth Khaṇḍa of the Second Adhyāya. Only the first three sheets are accented in this Ms.

॥ निघण्टुः ॥

1699. NIGHAṆṬUḤ.

T. S. Collection No. 29. Substance—Paper. Size—$8\frac{1}{4} \times 3\frac{3}{4}$ inches. Sheets—5. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—62. Author—Yāska. Incomplete.

Beginning, end, colophon and subject—Same as No. 1698.

Remarks:—The Ms. is in a fairly good conditon. Only the first two sheets are accented.

॥ निघण्टुभाष्यम् ॥

1700. NIGHAṆṬUBHĀṢYAM.

Burnell's Catalogue No. 2385. **Page** 2. Right **column. Substance**—Paper. **Size**—$10 \times 4\frac{1}{2}$ **inches.** Sheets—144. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—5325. Author—Devarājayajvan. Complete.

Beginning:

श्री महागणपतये नमः ।

ॐ महस्त्रय्यन्तकान्तारसञ्चारिकरिणं मुखे ।
मदालदैत्यमातङ्गभङ्गे केसरिणं भजे ॥ १ ॥

नमस्त्रिधाम्ने शिपिविष्टधाम्ने
निरुक्तविद्यानिगमप्रतिष्ठां ।
अवाप यास्को विविधेपि(षु) यागे-
ष्वनेन नाम्ना यमभिष्टुवानः ॥ २ ॥

प्रणमामि यास्कभास्कर(रं)
माहुस्त(यो हृत्त)मसः प्रकाशितपदार्थः ।
यस्य भुवनत्रयीमिव
गावः प्रकटां त्रयीं वितन्वन्ति ॥ ३ ॥

वागीश्वरं वचोभि-
र्वसिष्ठमुख्यान्मुनींस्तपोभिश्च ।
अनुकृतवन्तं वन्दे
पितामहं देवराजयज्वानम् ॥ ४ ॥

आचार्यं शाब्दिकानां ऋचि यजुषि च यद्दृष्टतुल्यप्रभावं
वन्दे नैरुक्तविद्वन्निकषमुपनिषद्वल्लरीणामुपघ्नम् ।
आभक्ता(हर्ता)रं क्रतूनामवनिसुखकरप्राक्रियानुक्रियायै
तातं यज्ञेश्वरार्यं(र्य्यं) प्रतिहततमसं ज्ञानभास्वन्मयूखैः ॥५॥

यज्वा रङ्गेशपुरीपर्यन्तग्रामवास्तव्यः ।
विरचयति देवराजो नैघण्टुककाण्डनिर्वचनम् ॥ ६ ॥

भगवता यास्केन समाम्नायं नैघण्टुकनैगमदेवताकाण्डरूपेण त्रिविधं गवादिदेवपत्न्यन्तं निर्ब्रुवता नैगमदेवताकाण्डपरिपठितानि पदानि प्रत्येकमुपादाय निरुक्तानि दर्शितानि निगमानि च । नैघण्टुककाण्डपरिपठितानां तु गवाद्यपारेऽन्तानामेकचत्वारिंश(च्छ)तत्रयाधिकं सहस्रं सामान्येन 'एतावन्त्यस्य सत्वस्य नामधेयानी'ति व्याख्याय तत्र प्रदर्श्य कतिचिदेव निरुक्तानि तथा[पि] कानिचिदेव दर्शितनिगमानि । अन्यानि तु ग्रन्थविस्तरभीत्या सामान्ये(न) निर्वचनलक्षणस्योक्तत्वात् बुद्धिमद्भिर्निर्वक्तुं सुशकानीत्यभिप्रायेण चोपेक्षितानि ॥ स्कन्दस्वामी च तत एव निरुक्तमनुजगाम । तत्र तु 'दिवश्चादित्यस्य च साधारणनामानि स्वरादीनि षट्'— 'इदमादीनि च उपमाभेदात् भेदनामानि द्वादश' —'प्रपित्वे अभीके इत्यादीनि च षड्विंशतिश्च' भाष्य-

कारेण बहुवक्तव्यत्वात् प्रकरणश एव निरुक्तानि, स्कन्दस्वामिना च व्याख्यातानि । अतोऽन्येषां यथाक्रमेणानिरुक्तेर्निगमाप्रदर्शनाच्च स्वरूपमात्रमपि अध्ययनादेवावगन्तव्यम् । तच्चाध्ययनं कलियुगे प्रायेण विच्छिन्नसम्प्रदायमासीत् । ततश्च कोश एव शरणमासीत् । तेषु च केषुचिदर्थेषु लेखकप्रमादादिभिः कानिचित्पदानि अधिकान्यासन् अन्येषु च कानिचिन्न्यूनानि, अपरेषु च कानिचिदपहाय कानिचित् विश्रस्तानि अक्षराणि च विपर्यस्तानि । एवं व्याकीर्णेषु कोशेषु नियमैकभूतस्य प्रतिपदनिर्वचननिगमप्रदर्शनपरस्य कस्यचिद् व्याख्यानस्य अभावात् नैघण्टुकं काण्डमुत्सन्नप्रायमासीत् ॥

ततश्च पाठसंशोधनार्थं बालानां सुगमत्वाय च तद्गतानां पदानां क्रमेण प्रतिपदनिर्वचननिगमौ प्रदर्शयितुं,—स्वरादीनीति पूर्वमुक्तस्य प्रकरणत्रयस्य, नैगमे(म)देवताकाण्डगतानाञ्च पदानां[च]भाष्यकारेण निरुक्तानां स्कन्दस्वामिना (च) कृतव्याख्यानानां प्रक्रियायां(यया) उन्मीलयितव्यम्, बहवस्तु[च](बहुशस्तु)नैघण्टुककाण्डनिर्वचनानन्तरं तदुन्मीलयितुञ्चायमस्मत्परिश्रमः ॥

इदञ्च स्वमनीषिकया न क्रियते । किन्तु नैघण्टागतेष्वेव पदेष्वध्यर्द्धशतत्रयमात्राणि पदानि भाष्यकारेणैव तत्र तत्र निगमेषु प्रसङ्गान्निरुक्तानि, स्कन्दस्वामिना च निगमव्याख्यानेषु अन्यानि च पदानि शतद्वयमात्राण्युपात्तानि । तेन च समाम्नायपठितानां पदानामन्येभ्यो व्यावृत्त्यर्थं किञ्चिच्चिह्नं न कृतम्, अतस्तेषां पाठशुद्धिस्तत्रैव शुद्धा ।

अन्येषाञ्च पदानां अस्मत्कुले समाम्नायाध्ययनस्य(स्या) विच्छेदात्— श्रीवेङ्कटाचार्यतनयस्य माधवस्य भाष्यकृतौ नामानुक्रमण्या आख्यातानुक्रमण्याः, (स्वरा[ना]नुक्रमण्याः) निपातानुक्रमण्याः निर्वच(निर्बन्ध)नानुक्रमण्याः तदीयस्य भाष्यस्य च बहुशः पर्यालोचनात्, बहुदेशसमानीतबहुकोशनिरीक्षणाच्च पाठः संशोधितः। निर्वचनञ्च निरुक्तम्। स्कन्दस्वामिकृतां निरुक्तटीकां स्कन्दस्वामि-भवस्वामि-गुहदेव(राहदेव)- श्रीनिवास-माधवदेव-उवट-भट्टभास्करमिश्र भरतस्वाम्यादिविचरि(रचि)तानि वेदभाष्याणि, पाणिनीयं व्याकरणं, विशेषत उणादितद्वृत्तिं क्षीरस्वाम्य-नन्ताचार्यादिकृतनिघण्टुव्याख्यां, भोजराजीयं व्याकरणं, कमलनयनीयनिखिलपदसंस्कारौ(संस्कारौ)श्च निरीक्ष्य क्रियते। तत्र च अस्मद्व्याख्येयानां तत्र दृष्टानां तद्ग्रन्थश्च ततश्च (पदानां तत्तत्कृतञ्च) निर्वचनमुपादाय तदेवास्मत्प्रकरणानुरूपं चेत्तद्वच(दु)-ल्लिख्यते। अननुरूपन्तु किञ्चिद्विपरिणमय्य, अन्येषाञ्च कतिपयानां निरुक्तकारोक्तनिर्वचनसामान्यलक्षणमनुसृत्य, निरुक्तिः क्रियते।

निगमश्च दक्षि[दाक्षि]णापथनिवासिभिरधीतेषु वेदेषु परिदृश्यमानस्तत्तद्भाष्याणि निरीक्ष्य तत्र तत्र प्रदर्श्यते, अदृष्टनिगमानाञ्च पदानाञ्च बहुवेदविद्भिर्निगमा अन्वेष्याः। अतोऽस्माभिर्यथामति प्रदर्शितौ प्रतिपदनिर्वचननिगमौ विद्वांसो बुद्ध्या निरूप्य शुक्रभाषितत्वन्मनासि कुर्वन्तु।

"अथातोऽनुक्रमिष्याम" इत्यादि निरुक्ते तस्य टीकायाश्च (यत्)नैघण्टुककाण्डविषयमुक्तं तत्सर्वं तत्रैव द्रष्टव्यम् ॥

आदित एकविंशतिः पृथिवीनामधेयानि— गौः० ॥

End:

वाजिनः । वाजिशब्दोऽश्वनामसु व्याख्यातः । रश्मयोऽभिधेयाः । देवाश्च वाजिनः । 'शन्नो भवन्तु वाजिनो हवेषु' ॥ देवपत्न्यः । देवपत्न्यो देवानां पालयित्र्यः पालनीया (वा) । उत ग्नाव्यन्तु देवपत्नीः । अध्यायसमाप्तिद्योतकं द्विर्वच(न)म् ॥

Colophon:

इति श्रीदेवराजयज्वकृतिर्दैवताकाण्डनिर्वचनव्याख्याने
पञ्चमोऽध्यायः समाप्तः ॥
शुभमस्तु । श्रीरस्तु ॥

Subject: Nighaṇṭubhāṣya. 1-5 Adhyāyas.

Remarks:—The Ms. is in very good condition. The Nighaṇṭu bhāṣya together with the Nighaṇṭu text is edited by Jīvānanda Vidyāsāgar in Calcutta. The author of this work is Devarājayajvan, son of Yajñeśvara and grandson of Devarājayajvan. He is an inhabitant of a village near Raṅgeśapurī, probably the modern Seringapatam(?).

॥ निघण्टुभाष्यम् ॥

1701. NIGHAṆṬU BHĀṢYAM.

J. L. Collection No. 89. Substance—Paper. Size—10×3¾ inches. Sheets—171 (1-176; 79th and 167-170 leaves are missing). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—5000. Author—Devarājayajvan. Incomplete.

Beginning and subject—Same as No. 1700.

End :

अश्वाजनी । अश्वा अज्यन्ते क्षिप्यन्ते प्रेर्यन्तेऽनया । ल्युट् यावयीविति('वायौ' इति)वीभावविकल्पः । टित्वाड्डीप् । अश्वाना(मजनी अश्वाजनी कशोच्यते) ॥

Colophon : (Sheet No. 173).

इति देवराजकृतिनैगमकाण्डनिर्वचनव्याख्या समाप्ता ॥

Remarks :—The Ms. is old and is in good condition, though some sheets are rat-eaten. This Ms. breaks off in the middle of the commentary on the third Khaṇḍa of the Fifth Adhyāya of the Nighaṇṭu.

॥ निरुक्तम् ॥

1702. NIRUKTAM.

J. L. Collection No. 169. Substance—Paper. Size—9⅜ × 4⅛ inches. Sheets—138 (1-62 & 1-76). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—2750. Author—Yāska. Complete.

Beginning:

श्रीगणेशाय नमः ॥

ॐ समाम्नायः समाम्नातः स व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते निघण्टवः कस्मात् निगमा इमे भवन्ति छन्दोभ्यः समाहृत्य समाहृत्य समाम्नातास्ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः । अपि वाहननादेव स्युः समाहता भवन्ति । यद्वा समाहृता भवन्ति । तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति । तत्रै-

तत्रामाख्यातयोर्लक्षणं प्रदिशन्ति भावप्रधानमाख्यातं सत्वप्रधानानि नामानि। तद्यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति-पचतीत्युपक्रम-प्रभृत्यपवर्गपर्यन्तं मूर्तं सत्वभूतं सत्वनामभिर्व्रज्यापक्ति-रित्यद इति सत्वानामुपदेशो गौरश्वः पुरुषो हस्तीति भवतीति भावस्यास्ते शेतेर्व्र(व्र)जति तिष्ठतीतीन्द्रियनित्यं वचनमौदुम्बरायणः ॥ १ ॥

End:

मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदाचना दभन्।
विश्वा च न उपमिमीहि मानुष वसूनि चर्षणीभ्य आ ॥

मा च ते धामानि मा च ते कदा च नः सरिषुः सर्वाणि प्रज्ञानान्युपमानाय मनुष्यहितोऽयमादित्योऽयमा-त्मा ।

अथैतदनुप्रवदन्तं(न्त्यथैतं) महान्तमात्मानमेषर्गणः प्रवद-न्ति वैश्वकर्मणो देवानां नु वयं जानानासदासीन्नोसदासी-त्तदानीमिति च सैषात्मजिज्ञासा सैषा सर्वभूतजिज्ञासा ब्रह्मणः सारिष्टं सरूपतां सलोकतां गमयति य एवं वेद नमो ब्रह्मणे महते भूताय नमः पारस्कराय नमो यास्काय ब्रह्मशुक्लमसीय ब्रह्मशुक्लमसीय ॥ ५० ॥

Colophon:

इति निरुक्तोत्तरषट्के सप्तमो(ऽ)ध्यायः ॥ ७ ॥

सम(संव)त् १८७५ विरोधिनामसंवत्सरे चैत्रमासे कृष्णपक्षे १३ त्रयोदश्यां तिथौ निरुक्तग्रन्थ(:) समाप्त(:) ।

उत्तरषट्कं समाप्तमस्तु ॥

हस्ताक्षरशिवरामकेशव अम्बडकर काशीक्षेत्रातखेमेश्वरघाटि-
लेखन समाप्त ॥

काशीविश्वेश्वरार्पणमस्तु ॥

Subject: Nirukta, both a bhāṣya on the Naighaṇṭuka, Naigama and Daivata Kāṇḍas and an independent treatise on Vedic Etymology, by Yāska himself. It consists of 13 Adhyāyas, mainly divided into Pūrvaṣaṭka and Uttaraṣaṭka.

This Ms. adopts the following division into Adhyāyas and Khaṇḍas :—

First	Adhyāya	=	1—20	Khaṇḍas.
Second	,,	,,	1—28	,,
Third	,,	,,	1—22	,,
Fourth	,,	,,	1—27	,,
Fifth	,,	,,	1—28	,,
Sixth	,,	,,	1—36	,,
Seventh	,,	,,	1—31	,,
Eighth	,,	,,	1—22	,,
Ninth	,,	,,	1—43	,,
Tenth	,,	,,	1—47	,,
Eleventh	,,	,,	1—50	,,
Twelfth	,,	,,	1—46	,,
Thirteenth	,,	,,	1—50	,,

Remarks—The Ms. is in good condition. The Khaṇḍa index (giving the beginnings only) is given at the end of each Adhyāya of this Ms. For example, the index of the thirteenth Adhyāya (Pariśiṣṭādhyāya) is given as follows :

'अथेमा यद्यावो यदुवञ्चो विहिंसोतोः स्तृण्येवतरत्सः चत्वारिशृङ्गा सुव(स्व)र्यन्तश्चत्वारि वागृचो अक्षर आदित्य इत्यक्षरं न क्षरति हृदातष्टेषु व्याख्यातं दैवतं अग्निरस्मि जन्मनापश्यं गोपामाकाशगुणस्तं परिवर्तमानं सयद्यनुरुध्यतेश्रोत्तरमथ ये हिंसामाश्रित्याथ

हिंसामुत्सृज्य न तं हंसो धर्मः सोमः पवते ब्रह्मा देवानां तिस्रो-
वाच ईरयतिसोमं गावोक्रान्महत्तत्सोमो विधुन्दद्राणं साकञ्चानां
स्त्रियः सतीः सप्तार्धगर्भानविजानाम्यपाङ्प्राङेति तदिदास को
अप(द्य)युङ्क्ते क ईषते का अग्निमीट्टे त्वमङ्ग हंसः शुचिषद्वासुपर्णा
याहीन्द्र विप्रं विप्रासो जातवेदस इदन्तेन्याभिस्त्र्यम्बकं शतं
जीव मातेराधांसीति पञ्चाशत् "॥

The ṛks that are taken for interpretation are fully given in this Ms. and they are accented. In the Nirukta text also, a vertical stroke is given in red ink, to show where the student of Nirukta may stop while pronouncing the text in Saṃhitā-pāṭha. This Ms. is dated Samvat 1875 in Virodhi year or 1818 A. D. The scribe's name is Śivarāma Keśava Ambadkar. The Nirukta is edited by Dr. Roth along with Nighaṇṭu. Along with Durga's commentary it is edited by Jīvānanda Vidyāsāgar in Calcutta.

॥ निरुक्तम् ॥

1703. NIRUKTAM.

Burnell's Catalogue No. 8975. Page 2. Right column. Substance—Palm leaf. Size—16¼ × 1½ inches. Leaves—87. Lines—6 to a Page. Script—Telugu. No. of Granthas —1750. Author—Yāska. Complete.

Beginning—Same as No. 1702.

End:

हृदा तष्टेषु + ऊह एषां ब्रह्मेति वा सेयं विद्याश्रुति-
मतिबुद्धिस्तस्यास्तपसा पारमीप्सितव्यं तदिदमायुरिच्छ-
ता न निर्वक्तव्यं तस्माच्छन्दस्सु शेषा उपेक्षितव्या ।
अथागमो यां यां देवतां निवा (निराह) नुह(तस्या)-
स्तस्यास्ताद्भाव्यमनुभवत्यनुभवाति ॥ ५७ ॥

Colophon :

इति निरुक्ते द्वादशो(ऽ)ध्यायः ॥

Subject : Nirukta, a treatise on Vedic Etymology. 1-12 Adhyāyas.

This Ms. adopts the division of Nirukta into 12 Adhyāyas which are again sub-divided into a good number of Khaṇḍas, as the following table will show:

First	Adhyāya	=	1—20	Khaṇḍas.
Second	,,	,,	1—28	,,
Third	,,	,,	1—22	,,
Fourth	,,	,,	1—27	,,
Fifth	,,	,,	1—27	,,
Sixth	,,	,,	1—37	,,
Seventh	,,	,,	1—33	,,
Eighth	,,	,,	1—22	,,
Ninth	,,	,,	1—44	,,
Tenth	,,	,,	1—49	,,
Eleventh	,,	,,	1—49	,,
Twelfth	,,	,,	1—57 (59)	,,

Remarks :—The Pariśiṣṭādhyāya of Nirukta (1-13 Khaṇḍas only) is included in the 12th Adhyāya of this Ms. The Ms. is old and is in a fairly good condition though the sides of the leaves are a bit worm-eaten. The Khaṇḍa index (giving the beginnings only) is given at the end of each Adhyāya in this Ms.

For example, the index of the 12th Adhyāya is given as follows :

"अथातो द्युस्थाना, वसातिषुस्मे, हेहजाता, प्रातर्युजा, प्रातर्यजध्व, युष्-स्तचित्र,मेता ह्याः, सुकिंशुकं, वृषाकपाय्य,पागृह,न्त्वष्टा दुहित्रे, सविता व्याख्यातो, विश्वारूपाणि, प्रातर्जित,मुर(दु)त्स्यं, चित्रं देवानां शुक्रं ते, पथस्पथ, इदं विष्णु,र्विश्वानरो व्याख्यातो, विश्वा-नरस्य वस्पतिं, येनापावकेति चतुष्कं, केश्यार्ग्नि, त्रयः केशिनः,

पुनरेहि, यस्मिन्वृक्षे, पावीरवी, यदिन्द्राग्नी, पवित्रवन्त उतनो-हि,यमथर्वा,ऽथातो द्युस्थाना देवगणा,इमागिर: सप्त ऋषय,स्तिर्यग्बिलो देवानां भद्रौ मासो, यज्ञेन यज्ञं, सुगावो देवा, उमया अत्र, शन्नो भवन्तु, देवानां पत्नी, उतग्ना व्यन्त्वथेमा अतिस्तुतयो, यद्यावो, यदुदञ्चो, विहिसोतो, सृण्येव, तरत्स, इचत्वारिश्टङ्गा,स्वर्यन्त,इचत्वारि वाग्‌ (क्‌,ऋ)चो अक्षरे (आदित्य इत्य(ति,अ)क्षरं न क्षरति) हृदातष्टेषु, सप्त(नव)पञ्चाशत् ॥ "

Only the beginning and ending words of the ṛks taken for interpretation and illustration are given in this Ms.

॥ निरुक्तम् ॥

1704. NIRUKTAM.

J. L. Collection No. 81. Substance—Paper. Size—8¼ × 3¼ inches. Sheets—36. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—560. Author—Yāska. Incomplete.

Beginning—Same as No. 1703.

End:

इन्द्रेण हि सं दृश्यसे सञ्जग्मानो(ऽ)बिभ्युषा गणेन मन्दू मदिष्णू युवां रथोपि वा मंदुना तेनेति स्यात्समानवर्च(सेत्येतेन व्याख्यातं ॥ १२ ॥)

Colophon: (Sheet No. 33)

इति निरुक्ते तृतीयोऽध्यायः ॥

इदं पुस्तकं देवळे नरहरि॰ ॥

Subject: Nirukta. 1-4 Adhyāyas.

Remarks:—The Ms. is in good condition. It breaks off in the twelfth Khaṇḍa of the fourth Adhyāya. The Ms. belonged to

one Devale Narahari. The Khaṇḍa index (giving the beginnings only) is given at the end of each Adhyāya in this Ms.

॥ निरुक्तम् ॥

1705. NIRUKTAM.

Burnell's Catalogue No. 2380. Page 2. Right column. Substance—Paper. Size—8¾ × 3⅜ inches. Sheets—88. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1250. Author—Yāska. Daivata Kāṇḍa only.

Beginning:

श्री वेदव्यासाय नमः ॥

अथातो दैवतं तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते । सैषा देवतोपपरीक्षा यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छंस्तुतिं प्रयुङ्क्ते तद्दैवतस्स मन्त्रो भवति ॥

End—Same as No. 1702.

Colophon:

इति निरुक्ते त्रयोदशो(ऽ)ध्यायः ॥

Subject: Nirukta. 7-13 Adhyāyas.

Remarks:—The Ms. is old and is in a fairly good condition. For the index of this Ms. see Remarks on No. 1702.

॥ निरुक्तम् ॥

1706. NIRUKTAM.

T. S. Collection No. 26. Substance—Paper. Size—9¼ × 7¾ inches. Sheets—96. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas— 1250. Author—Yāska. Daivata Kāṇḍa only.

Beginning, end and subject—Same as No. 1705.

Colophon :

इति श्रीनिरुक्ते परिशिष्टो(ऽ)ध्यायः ।

इति निरुक्तं समाप्तम् ॥

शके १७५४ नन्दननामसंवत्सरमार्गशीर्षवद्यशनिवारीं

कमलाकररामभट्टाचार्यांक अप्पासामीनें लिहाला असें ॥

Remarks :—The Ms. is in good condition. The ṛks are fully given with accent in this Ms. For other details see Remarks on No. 1705. The Ms. is dated Śaka 1754 or 1832 A. D. in Nandana year and the scribe's name is given as Appāsāmi, son of Kamalākara Rāma Bhaṭṭācārya.

॥ निरुक्तम् ॥

1707. NIRUKTAM.

Burnell's Catalogue No. 2381. **Page** 2. Right **column.** Substance—Paper. Size—10×4 inches. Sheets—31. Lines —11 to a Page. Script—Devanāgarī. No. of Granthas —600. Author—Yāska. Daivata Kāṇḍa—incomplete.

Beginning and end—Same as No. 1705.

Colophon :

इति उत्तरषट्के समाप्तः त्रयोदशो(ऽ)ध्यायः ।

इति वेदाङ्गनिरुक्तं सम्पूर्णम् ॥

Subject : Nirukta. 7-10 and 13th Adhyāyas. This Ms. adopts a division into Adhyāyas, Pādas and Khaṇḍas as the following table will show :

Seventh Adhyāya	First	Pāda.	1—7	Khaṇḍas.
,,	Second	,,	8—13	,,
,,	Third	,,	14—19	,,
,,	Fourth	,,	20—22	,,
,,	Fifth	,,	23—25	,,
,,	Sixth	,,	26—33	,,
Eighth ,,	First & Second Pādas		1—15	,,

Eighth Adhyāya	Third	Pāda	16—22	Khaṇḍas.
Ninth ,,	First	,,	1—10	,,
,,	Second	,,	11—21	,,
,,	Third	,,	22—35	,,
,,	Fourth	,,	36—44	,,
Tenth ,,	First	,,	1—14	,,
,,	Second	,,	15—25	,,
,,	Third	,,	26—36	(Incomplete)
Thirteenth ,,	(?)	,,	38—48	(Incomplete).

Remarks:—The Ms. is old and is in a worn-out condition. This Ms. also gives the Khaṇḍa index and the extent of Khaṇḍas at the end of each Adhyāya but the total number of Khaṇḍas does not in some cases to coincide with the total number of Khaṇḍas given in the index. Only the beginning of the ṛks taken for interpretation is given in this Ms. The last thirteen Khaṇḍas of the 10th Adhyāya, the whole of 11th & 12th Adhyāyas and the first 37 Khaṇḍas of the 13th Adhyāya are missing in this Ms.

॥ निरुक्तवृत्तिः ॥

1708. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 a. Page 3. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—99. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Durgācārya. First Adhyāya only.

Beginning :

श्री गणपतये नमः ॥

आदितः पाणिनीयन्तु शिक्षा ज्योतिस्ततश्छन्दः ।
पश्चाच्यायी निघण्टोश्च निरुक्तमुपरिस्थितम् ॥ १ ॥
प्रणम्य तत्प्रवक्ष्यामि रुद्रायामिततेजसे ।
स मे दिशतु सुप्रीतो वाग्धियो शिष्टसम्मतिम् ॥

'समाम्नायः समाम्नातः स व्याख्यातव्यः'॥ अथ किमर्थं वेदो वेदाङ्गानि च प्रवृत्तानि। सर्वकामप्राप्त्यादिर्मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः। तत्परिज्ञानाय वेदाङ्गानि प्रवृत्तानि॥

End:

नैगममित्यैकपदिकं। नैघण्टुकानि नैगमानि पदानि चेह प्रकरणद्वये व्याख्यास्यामः॥ अध्यायपरिसमाप्तिलक्षणार्थः परितोषार्थो वा द्विरभ्यास इति॥

Colophon:

इति निरुक्तटीकायां जम्बूमार्गाश्रमवासिनः आचार्यभगवद्दुर्गस्य कृतौ षष्ठस्याध्यायस्य षष्ठः पादः समाप्तो(ऽ)ध्यायः(च) समाप्तः॥

Subject: Nirukta Vṛtti otherwise known as Niruktaṭīkā or Ṛjvarthā. First Adhyāya. 1-6 pādas.

Remarks:—According to the colophon of this commentary, the Nirukta forms the supplement to Nighaṇṭu. Hence the first Adhyāya of the Nirukta becomes the sixth Adhyāya of Yāska's work. The Ms. is recent and is in good condition. The paper is of Indian manufacture. The author of this commentary is said to be Bhagavad Durgācārya or Ācārya Durga simha who had lived in Jambūmārgāśrama (probably Jambukeśvara near Trichinopoly(?)). He belongs to the family of the Vasiṣṭhas. (cf. 'अहञ्च कापिष्ठलो वासिष्ठः'॥ Nirukta Vṛtti. IV. 14). The exact name of this commentary is Ṛjvarthā. See colophons on Nos. 1709 & 1710. This work is edited and published by Jīvānanda Vidyāsāgar at Calcutta.

॥ निरुक्तवृत्तिः॥

1709. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 b. Page 3. Left column.

Substance—Paper. Size—10×4½ inches. Sheets—35. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Durgācārya. Second Adhyāya only.

Beginning :

'अथ निर्वचनं'। नामाख्यातोपसर्गनिपातलक्षणमुक्त्वा शास्त्रारम्भप्रयोजनानि च वेदाङ्गव्यूहञ्च सप्रयोजनं निघण्टुसमाम्नायविरचनाञ्च प्रकरणत्रयविभागेनोक्त्वा दैवतमुत्कृष्य नैघण्टुकनैगमे प्रकरणे पुरस्कृते। नैघण्टुकानि नैम(ग)मानीहेति। ते पुनरेते निर्वचनलक्षणमनुक्त्वा न शक्येते व्याख्यातुं यस्मा'दथै'तस्मात्कारणान्निर्वचनं लक्षणतो व्याख्यास्याम इति शेषः ॥

End :

कमहं मलिनं शोधयामीति कल्मलीकिनं। जनं[जनं] भावयतीति जञ्जणाभवन् इत्येवमादि 'ज्वलतो नामधेयानी'ति ॥ अध्यायपरिसमाप्त्यर्थो द्विरभ्यासः ॥

Colophon :

जज्वा(ऋज्व)र्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमनिवासिनः आचार्यभगवद्दुर्गस्य कृतौ सप्तमो-

(ऽ)ध्यायः समाप्तः ॥ शुभमस्तु ॥

Subject : Nirukta Vṛtti otherwise known as Ṛjvarthā. Seventh (Second) Adhyāya. 1—7 Pādas.

Remarks :—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

1710. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2376. Page 3. Left column.

Substance—Paper. Size—10 × 4½ inches. Sheets—42. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas —1500. Author—Durgācārya. Third Adhyāya only.

Beginning:

श्री गणेशाय नमः ॥

'कर्मनामान्युत्तराणि षड्विंशतिः'। कर्मणो नामानि। कर्मनामानि। उत्तराणीति प्रकृतेभ्यो ज्वलन्नामधेयेभ्यः। ज्वलत्येव ह्यग्नौ (वासौ?) कर्माणि क्रियन्त इति ज्वलन्नामभ्य उत्तराणि कर्मनामानि। कियन्ति पुनस्तानि। षड्विंशतिः षडधिकविंशतिः षड्विंशतिः। कतमानि पुनस्तानि। अपः अप्नः दंसः इत्येवमादीनि ॥

End:

'द्यावा पृथिव्योर्महिमानमाचष्ट आचष्टे—' इति। एतदनेन मन्त्रेण द्यावापृथिव्योर्महिमानं महाभाग्यं मन्त्रदृगाचष्टे। एवमेतन्नैघण्टुकं प्रकरणं परिसमाप्तं ॥ अतः परमैकपदिकं भवति यस्यायमादिः 'एकार्थमनेकशब्द'मित्येतदुक्तमित्येवमादि ॥

Colophon:

इति श्रीजम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतावृज्वर्थायां निरुक्तवृत्तावष्टमो(ऽ)ध्यायः ॥

श्रीरस्तु ॥

Subject: Nirukta Vṛtti otherwise known as Ṛjvarthā. Third Adhyāya. 1—4 Pādas.

Remarks:—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

1711. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 d. Page 3. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—36. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—1325. Author—Durgācārya. Fourth Adhyāya only.

Beginning :

श्रीगणेशाय नमः ।

'एकार्थमनेकशब्दमित्येतदुक्तं' । किमर्थमिदमुच्यते । न हि यद्यद्वृत्तं तत्तद्वक्तव्यं । इदं वृत्तं इदं वर्तिष्यत इति । यद्यद्वृत्तं तत्तदनुक्तमपि प्रतीयते । यच्च वक्ष्यमाणमिति । आह— संक्षेपतो निगमनाय यदुक्तं यद्वा वक्तव्यं प्रतिजानीथ । समासविस्तराभ्यां हि सुखमाधस्त्यं प्रकरणमवधारयिष्यामहे । गृहीतार्थं सङ्क्षेपाच्च विस्तरेणोत्तरग्रन्थमुच्यमानं सुखमवभोत्स्यामहे ॥

End:

प्रकृतमिदानीं वर्णयिष्यामः । किञ्च पुनः प्रकृतम् । ऐकपदिकं समाम्नायव्याख्यानं तत्र यदुक्तं तदुक्तमेव । यदनुक्तं तद्वक्तव्यमितीदमारभ्यते 'सस्निमविन्दच्चरणे नदीना'मिति ॥

Colophon :

श्रीमज्जम्बूमार्गाश्रमवासिनो भगवद्दुर्गकृतवृत्तौ नवमाध्यायस्य चतुर्थः पादः । नवमाध्यायश्च समाप्तः ॥ (ऋज्वर्थायां)

Subject : Nirukta Vṛtti otherwise known as Nirukta vṛtti or Ṛjvarthā. Ninth (Fourth) Adhyāya. 1—4 Pādas.

Remarks :—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

1712. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 e. Page 3. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—50. Lines —12 or 13 to a Page. Script—Devanāgarī. No. of Granthas —1800. Author—Durgācārya. Fifth Adhyāya only.

Beginning:

श्रीगणेशाय नमः ॥

सस्निमित्य(त्येतद)नवगतं । अर्थाप्रतीतिरप्यनवगम-(म्य) इत्युच्यते । लक्षणासम्पन्नश्च संस्कारः खल्वपि अवि-ज्ञातमित्युच्यते । तत्रैवं सति क्वचित्प्रकृत्यादेः संस्कार-स्यानवगमः । क्वचिदर्थाप्रतीतिरेव । क्वचिदुभयस्याप्य-नवगमः । यथास्मिन्नेव सस्निमिति ॥

End:

'अन्तिकतमं' सन्निकृष्टतममौषधं पक्वं आगच्छेदिति युष्माभिरेवमुक्तं भवतु(मुक्ते सति) एतद्वयमाशास्महे । 'प-क्वमौषधमागच्छत्वि'ति । अध्यायसमाप्त्युपप्रदर्शनार्था-य द्विरभ्यास इति ॥

Colophon:

इति श्रीमद्भगवद्दुर्गकृतवृत्तौ दशमस्याध्यायस्य चतुर्थः पादः ।

अध्यायश्च समाप्तः ॥

Subject: Nirukta Vṛtti otherwise known as Nirukta vṛtti or Ṛjvarthā. Tenth (Fifth) Adhyāya. 1—4 Pādas.

Remarks:—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

1713. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 f. Page 3. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—51. Lines—13 or 14 to a Page. Script—Devanāgarī. No. of Granthas—1556. Author—Durgācārya. Sixth Adhyāya only.

Beginning :

श्रीगणेशाय नमः ॥

'आशुशुक्षणि'रित्यनवगतं। 'आशु शु [क्स]चा(चा)सनितावा'स्याद् आशु(शु)चाक्षणितावा॥' "त्वमग्ने द्युभिस्त्वमाशुशुक्षणिः० जायसे शुचिः" ॥ १ ॥ गृत्समदस्येदमार्षं । प्रातरनुवाकाश्विनयोः शस्यते । जगत्याग्नेयी । हे भगवन्नग्ने । त्वं द्युभिः अहोभिर्निमित्तभूतैः पौर्णमास्याद्यैरेषां मथ्यमानो नृणां जायसे । पौर्णमास्याममावास्यायां वाऽऽदधीतेत्युक्तम् ॥

End :

अधुनास्य मन्त्रस्य भाष्यकारः समस्तार्थमाह—"यवृष्ट ओषधय उद्यन्ति प्राणिनश्च पृथिव्यां तदश्विनो रूपं।" सो(ऽ)श्विनोरधिकारः । तदश्विनोर्माहाभाग्यं । तेन माहाभाग्यलक्षणेन रूपेणैतावश्विनौ मन्त्रदृक् स्तौति स्तौति ॥

Colophon :

एकादशस्य षष्ठः पादः ॥

इति श्रीजम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तावेकादशोऽध्यायः ॥

यावन्तो मन्त्राः सर्वशाखासु तेषु यानि गुणपदानि लक्षणोद्देशतः तानि सर्वाण्येव व्याख्यातानि ॥ अस्मिन्नध्याये व्याख्याता

ऋचः ॥ २७० ॥ एवमध्यायषट्के ऋचः ॥ ४६० ॥

संवत् १८२० मार्गशिरःकृष्णद्वितीयायां लिखितम् ।

श्रीरस्तु ॥ ग्रन्थसङ्ख्या ॥ १५५६ ॥

Subject:—Nirukta Vṛtti otherwise known as Ṛjvarthā. Eleventh (Sixth) Adhyāya. 1—6 Pādas.

Remarks:—The Ms. is in good condition. The Ms. is dated Saṃvat 1820 or 1763. A. D.

॥ निरुक्तवृत्तिः ॥

1714. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 g. Page 3. Left column. Substance—Paper. Size—10×4½ inches. Sheets—48. Lines—13 to 14 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Durgācārya. Seventh Adhyāya only.

Beginning:

श्रीगणेशाय नमः ॥ श्रीविश्वेश्वर्यै नमः ॥

समाप्तं चैकपदिकं प्रकरणमस्यानुदैवतं तद्भवति यस्यायमादि'रथातो दैवत'मिति ॥ यावन्तो मन्त्राः सर्वशाखासु, तेषु यानि गुणपदानि लक्षणोद्देशतस्तानि सर्वाण्येव व्याख्यातानि । द्वयोः प्रकरणयोः नैघण्टुकैकपदिकयोः, संविज्ञातपदानि तु प्रधानस्तुतिभाग्देवताविषयाण्यग्न्यादीनि सर्वमन्त्रेष्ववशिष्यन्ते । तानि च पुनरमूनि समाम्नातान्यस्मिञ्छास्त्रे अग्न्यादीनि देवपत्न्यन्तानि । य(अ)तस्तद्व्याच(चि)ख्यासयेदमारभ्यते ॥ 'अथातो दैवत'मिति ॥

End:

तदेवमेतस्मिन्वैश्वानरपदविचारप्रसङ्गे हविष्पान्तीयं सूक्तमुपक्षिप्य सूर्यो वैश्वानरोऽग्निर्वैश्वानर इति एकमेवेदं ज्योतिस्त्रिधा वर्तते इति मन्त्रस्य भावोपप्रदर्शनार्थमुपवर्णितम् । ईदृशेषु शब्दार्थन्यायसङ्कटेषु मन्त्रार्थघटनेषु दुरवबोधेषु मतिमतां मतयो न प्रतिहन्यन्ते । वयन्त्वेतावदत्रावबुद्ध्यामह इति ॥

Colophon:

इति ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गकृतौ द्वादशो(ऽ)ध्याय: समाप्त: ॥

शुभमस्तु ॥

Subject: Nirukata vṛtti otherwise known as Ṛjvarthā. Twelfth (Seventh) Adhyāya. 1—7 Pādas.

Remarks:—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

1715. NIRUKTA VṚTTIḤ.

Burnell's Catalogue. No. 2379 h. Page 3. Left column. Substance—Paper. Size—10×4½ inches. Sheets—18. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—650. Author—Durgācārya. Eighth Adhyāya only.

Beginning:

श्रीः ॥ 'द्रविणो दा' इत्येतद्देवतापदं निर्वाच्यं । तदर्थमुपोद्घातः—'द्रविणोदाः कस्मा'दिति । तत्र पूर्वपदमेव तावत्प्रथमं विगृह्य निराह—'धनं द्रविणमुच्यत' इति । तत्कस्मात्, 'यदेनमभिद्रवन्ति' । कर्मकारकम् । यस्मादेतदाभिमुख्येन तदार्थिनो(ऽ)वश्यं द्रवन्ति ॥

End :

तत्र नराशंसयाजिनां सौत्रामणिप्रयोगे कथं प्रयोगः । किं तनूनपाच्छुचिव्रत इत्येतदेव प्रयुज्यतां उतान्यः कुतश्चिदाप्रीसूक्तादाह्रियतां नराशंस इति न्यायविदो मेधाविनः समनुगंस्यन्ते विशेषमिति ॥

Colophon :

इति श्रीनिरुक्तवृत्तौ त्रयोदशो(ऽ)ध्यायः समाप्तः ॥

श्रीगृहपतिः प्रीयतां ॥

Subject : Nirukta vṛtti otherwise known as Ṛjvarthā. Thirteenth (Eighth) Adhyāya. 1—3 Pādas.

Remarks :—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

1716. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 i. Page 3. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—14. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Durgācārya. Ninth Adhyāya only.

Beginning :

श्रीगणेशाय नमः ॥

"अथ यानि पृथिव्यायतनानि सत्वानी" त्येवमादि । अथेति विशेषाधिकारे । प्रकृतार्थादनन्तरं अधिकरोति । 'पृथिव्यायतनानि' पृथिव्याश्रयाणि 'सत्वानि' द्रव्याणि च ॥ तेषामप्यत्र विवक्षितत्वात् । 'स्तुतिं लभन्त' इति समाम्नातानि । 'तानि' 'अतः' पर'मनुक्रमिष्यामः' व्याख्यास्यामेति शेषः ॥

End :

तामेवं लक्षणं 'ऊर्जं' 'ऊर्जाहुती' 'ऊर्जयमाने' बल-
वती ऊर्जतां च कुर्वाणे 'अधातां' दद्यां । 'वसुवने' 'वसुव-
ननाय च' 'वसुधेयस्य' 'वसुधानाय च' 'वीतां' पिबेतां
कामयेतां वा । 'यजे'ति संप्रैषो यजेति संप्रैषः ॥

Colophon :

जम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्यस्य कृतौ
ऋज्वर्थायां निरुक्तवृत्तौ चतुर्दशो(ऽ)ध्यायः ॥

Subject . Nirukta vṛtti otherwise known as Ṛjvarthā. Fourteenth (Ninth) Adhyāya. 1—4 Pādas.

Remarks :—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

1717. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 j. Page 3. Left column. Substance—Paper. Size—10×4½ inches. Sheets—23. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Durgācārya. Tenth Adhyāya only.

Beginning :

श्रीः ॥ व्याख्यातानि पृथिवीस्थानदेवतापदानि ।
अधुना समाम्नायानुक्रमेणैव मध्यमस्थानदेवतापदानि
व(निर्व)क्तव्यानि । तदर्थमिदमारभ्यते । 'अथातो म-
ध्यस्थाना देवता' इति ॥ अथशब्दो विशेषाधिकारा-
र्थः । अतःशब्द आनन्तर्यार्थः । मध्यं स्थानमेतासामिति
मध्यस्थाना देवताः वाख्याद्याः वक्ष्यन्त इति वाक्यशेषः ॥

End :

अपि च सर्वमेतदुपपद्यते, पुरूरवस्त्वयि यस्मा[तस्मा]-
'न्महते' 'रणाय' 'रमणीयाय' 'सङ्ग्रामाय' असुरैः सह
(दस्युह)त्याय' शत्रुवधायावर्धयन् स्वैर्महिमभिस्त्वं नो
असुरान्जेष्यसीति पुरश्चक्रुर्देवा इति । द्विरभ्यासोऽध्याय-
समाप्तौ, यस्माल्लक्ष्यते समाप्तम् ॥

Colophon :

इति श्रीमज्जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्ग(स्य)
कृतावृज्वर्थायां निरुक्तवृत्तौ पञ्चदशोऽध्यायः समाप्तः ॥
श्रीगृहपतिः प्रीयतां ॥

Subject: Niruktavṛtti otherwise known as Ṛjvarthā. Fifteenth (Tenth) Adhyāya. 1-4 Pādas.

Remarks :—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

1718. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 k. Page 3. Right column. Substance—Paper. Size—10 × 4½ inches. Sheets—19. Lines—13 to 15 to a page. Script—Devanāgarī. No. of Granthas—675. Author—Durgācārya. Eleventh Adhyāya only.

Beginning :

श्रीगणेशाय नमः ॥

'श्येनो' व्याख्यातः । 'श्येनः शंसनीयं गच्छती'ति ॥
इह त्वभिधेयो मध्यमः । 'तस्यैषा भवति'— आदाय-
श्येन इति । वामदेवस्यार्षं । श्येनाजिरादिषु मरुत्वतीये
शस्यते। ऋत्विग्भिर्विधानतः। प्रत्तं 'श्येन' इन्द्रः 'सोममा-

दाय अभरत् अपिबत् । क । 'सहस्रं सवान्' । सहस्रं सुत्यानां यत्र कुर्वन्ति ।

End:

'आ यस्मिन् तस्थौ' यस्मिन्नातस्थौ यस्मिन्नातिष्ठति । रंहणे गमने । 'रोदसी' 'सचा' सह ('मरुत्सु') मरुद्भिः सहिता मरुद्भिः रोदसी । किमिति 'सुरणानि' सु रमणीयानि उदकानि बिभ्रती धारयन्त्यातिष्ठति । तं वयं मेघं रथमाह्वयामहे वर्षार्थमिति ॥

Colophon:

इति श्रीजम्बूमार्गनिवासिनो भगवद्दुर्गाचार्यस्य कृतौ निरुक्तवृत्तौ षोडशो(ऽ)ध्यायः ॥

Subject: Nirukta Vṛtti otherwise known as Ṛjvarthā. Sixteenth (Eleventh) Adhyāya. 1-4 Pādas.

Remarks:—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

1719. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 l. Page 3. Right column. Substance—Paper. Size—10 × 4½ inches. Sheets—22. Lines—14 to 16 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Durgācārya. Twelfth and Thirteenth Adhyāyas only.

Beginning:

श्रीगणेशाय नमः ॥

व्याख्याता मध्यस्थाना देवताः सवचनलिङ्गविशेषाः । अधुना (ए)तेनैव समाम्नायानुक्रमेण द्युस्थाना व्याख्येयाः ; तदर्थं विशेषतः पुनरधिकारवचनं— अथातो द्युस्थाना

देवता इति। बहुवचनं पक्षेऽर्थवत्। द्यौः तेषां स्थानमिति द्युस्थानाः देवता व्याख्यास्यन्त इति शेषः ॥

End :

'तदिद'मतपस्विना सर्वथाप्या'युरिच्छता' निरुक्त-शास्त्रं न (नि)र्वक्तव्यं । अ(त)पस्वी ह्यागमवानपि मलि-नान्तःकरणत्वान्न शक्नुयात् ततो(ऽ)स्यायुश्छिद्येत। तप-स्विनापि च निर्ब्रुवता । 'तस्माच्छन्दस्सु' शाखान्तरेषु निगमोदाहरणानामाकाङ्क्षितत्वनिराकाङ्क्षिता(ङ्क्षा)यै वाक्य-शेषाः पादार्द्धर्चादिलक्षणाः उपेत्ये(उपे)क्षितव्या इति ॥

Colophon :

इति श्रीजम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्यस्य
कृतावृज्वर्थायां निरुक्तवृत्तावष्टादशो(ऽ)ध्यायः ।
निरुक्तवृत्तिः समाप्ता ॥ शुभमस्तु। श्रीरस्तु ॥

निरुक्तं त्रिकाण्डमुक्तं ॥

आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा ।
तृतीयं दैवतं चेति समाम्नाये त्रिधा स्थितः ॥

गौराद्यपारेपर्यन्तमाद्यं नैघण्टुकं मतम् ।
जहाद्युल्बमृबीसान्तं नैगमं सम्प्रचक्षते ॥

अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते ।
अग्न्यादिदेवी ऊर्जाहुत्यन्तः क्षितिगतो गणः ॥

वाय्वादयो भगान्ताःस्युरन्तरिक्षस्थदेवताः ।
सूर्यादिदेवपत्न्यन्ता द्युस्थाना देवता इति ॥

